# Sanskrit Notes

(1). अधोलिखितस्य पाठ्यपुस्तकात् पठितगद्यांशस्य सप्रसङ्ग हिन्दी भाषयाम् अनुवादं लिखत्।

अनन्तरं सर्वे जालेन बद्धाः बभूवुः। ततो यस्य वचनात् तत्र अवलम्बितातं सर्वे तिरस्कुर्वन्ति। तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच "नायमस्य दोषः। विपत्काले विस्मय एव कापुरुषलक्षणंम्। तदत्र धैर्यमवलम्ब्य प्रतिकारश्चिन्त्यताम् । इदानीमप्येवं क्रियताम् । सवैरेकचित्तिमूय जालमादायोडीयातम्।" इति विचिन्त्य सर्वे पक्षिणः जालमादायोत्पतिताः। अनन्तरं स व्याघ्रः सुदुरज्जालापहारकान् तान् अवलोक्य पश्चात् धावनम् अकरोत्।

अथवा

तेन पुनः सैन्यशक्तिसङ्ग्रहकार्यम् आरब्धम् , महासैन्यं सः रचयामास । तया सेनया च मुगलशासनं प्रति स्वातन्त्र्ययुद्धं प्रारभत। स्वराज्यहस्तच्युतान् अनेकभागान् पुनः हस्तगतान् कृतवान्। तेषु मोही , गोगुन्दा , उदयपुरम् इत्यादयः मुख्याः आसन्। स्वराज्ये शान्तिं संस्थाप्य "चावण्ड " नामकं स्थानं स्वराजधानिम् अकरोत्। तस्मिन् काले "चावण्ड " स्थानं स्थापत्यकलायाः, ललितकलायाः, वाणिज्यस्य , विधायाश्च प्रमुखकेन्द्रम् आसीत्।

(2). अधोलिखितस्य पाठ्यपुस्तकात् पठितपद्यांशस्य सप्रसङ्ग हिन्दी भाषयाम् अनुवादं लिखत्।

विधा विवादाय धनं मदाय,

शक्तिः परेषां परिपीडनाय।

खलस्य साधोर्विपरीतमेतत् ,

ज्ञानाय दानाय च रक्षणाय

अथवा

वर्षागमे चारुमरुं विहाय

कवान्यत्र कस्यापि रमेत चित्तम्।

सरःसु वर्षासमयेऽपि यस्मिन् ,

शरत् – प्रसन्नं सलिलं चकास्ति।।

(3). अधोलिखितस्य पाठ्यपुस्तकात् पठितपद्यांशस्य सप्रसङ्ग संस्कृते व्याख्या कार्या-

न जातु दुःखं गणनीयम्

न च निजसोख्यं मननीयम्।

कार्य-क्षेत्रे त्वरणीयम्

लोकहितं मम करणीयम्।।

अथवा

अजरामरवत् प्राज्ञो विधामर्थं च चिन्तयेत्।

गृहीत इव केशेषु मृत्युना धर्ममाचरेत्।।

(4). अधोलिखितस्य पाठ्यपुस्तकात् पठितपद्यांशस्य सप्रसङ्ग संस्कृते व्याख्या कार्या-
प्रथमा – वत्स एनं बालमृगेन्द्रं मुञ्च। अपरं ते क्रीडनकं दास्यामि।

बालः – कुत्र , देह्येतत्  (इति हस्तं प्रसारयति)

द्वितीया – सुव्रते , शक्य एष वाचामात्रेण विरमयितुम्। गच्छ तत् मदीय उटजे मार्कण्डेयस्य ऋसिकुमारस्य वर्णिचित्रितो मृतिकामयुरस्तिस्ष्थिति, तमस्योपहर।

प्रथमा – तथा। (इति निष्कान्ता)

अथवा

सर्वदारः – (तथा निपुणं निरीक्षमाणः) महाराज ! मेवाड-मन्त्री भामाशाहः इव कश्चन आगच्छन् प्रतीयते।

प्रतापः – हु, किम् उक्तम् ! भामाशाहः ? तस्य कथम् इदं ज्ञातम् अभूत ? अस्तु तावत्, प्रतिक्षामहे तम्।

(भामाशाहः धनराशिग्रन्थिम् आदाय आयाति)

भामाशाहः – (प्रणम्य) अन्नदातः! सेवकं संत्यज्य क्व प्रस्थियते श्रीमता ?

(5). अधोलिखितेषु अष्टसु केषाञ्चन षट् प्रश्नानामुत्तराणि संस्कृतमाध्ययेन लिखित –
(i) “जयसुरभारति !” इति पाठस्य रचयिता कः अस्ति ?

(ii) “संघे शक्तिः” इति पाठनुसारेण “अद्य प्रातरेव अनिष्ट्दर्शन जातम्, न जाने किम् अनभिमतं दर्शयिष्यति।”  इति कः कथितवान् ?

(iii) “स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः” इति कथनं कस्य कृतेः अस्ति ?

(iv) महाराणाप्रतापस्य राज्याभिषेकः कस्मिन् ग्रामे अभवत् ?

(v) मरुप्रदेशे व्याप्तानां मृत्युभोजनं, बालविवाहः, नार्युत्पिडनं, यौतुकप्रथादिनां कुप्रथानां  सदेव कः सचेष्टः आसीत् ?

(vi) “मरु सौन्देर्यम्” इति पाठानुसारेण ‘शुष्कोऽपि नित्यं सरसः स देशः’ इति केन प्रशंसितः ?

(vii) महाराजः सूरजमल्लः कस्य ज्येष्ठपुत्रः आसीत् ?

(viii) ‘यो यद्वपति बीजं हि लभते तादृशं फलम्’ इति पाठानुसारेण कथं तेषा दायादानां मया प्रत्यपकारः कर्तव्यः इति केन चिन्तितम् ?

निर्देशः- प्रश्न संख्या 6 – 9 पर्यन्तं रेखाङ्कितपदमाधृत्य प्रश्न निर्माणं कुरूत-

6. अहिंसा परमों धर्मः ।

7. पृथिव्यां त्रीणि रत्नानि सन्ति।

8. एतेन मम न अपमानः

9. नायकेषु अन्यतमः सूरजमल्लः आसीत्।

10. प्रश्नपत्रादतिरिच्य स्वपाठ्यपुस्तकात् श्लोकद्वंय लिखत –

11. अधोलिखितं गंद्याशं पठित्वा एतदाधारित – प्रश्नानाम् उत्तराणि यथानिर्देशं लिखतः

दैनन्दिनव्यवहारे यः सहायतां करोति सः बन्धुः भवति। यदि विश्वे सर्वत्र एतादृशः भावः भवेत् तदा विश्वबन्धुत्वं सम्भवति। परन्तु अधुना संसारे कलहस्य अशान्तेः च वातावरणम् अस्ति। मानवाः परस्परं न विश्वसन्ति। ते परस्य कष्टं स्वकीयं कष्टं न गणयन्ति। संसारे सर्वत्र विद्वेषस्य शत्रुतायाः हिंसायाः च भावना दृश्यते, देशानां विकासः अपि अवरूद्धः भवति। इयं महती आवश्यकता वर्तते यत् एकः देशः अपरेण देशेन यह निर्मलेन हृदयेन बन्धुतायाः व्यवहारं कुर्यात्। विश्वस्य जनेषु इयं भावना आवश्यकी। ततः विकसिताविकसितयोः देशयोः मध्ये स्वस्था स्पर्धा भविष्यति। सर्वे देशा ज्ञानविज्ञानयोः क्षेत्रे मैत्रीभावनया सहयोगेने च समृद्धिं प्राप्तुं समर्था भविष्यन्ति। सूर्यचन्द्रयोः प्रकाशः सर्वत्र समानरूपेण प्रसरति। प्रकृतिः अति सर्वेषु समत्वेन व्यवहरति। तस्मात् अस्माभिः सर्वैः परस्परं वैर- भावम्ॖ अपहाय विश्वबन्धुत्वं स्थापनीयम्।

(क) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

(ख) यथानिर्देशं प्रश्नानाम् उत्तराणि लिखत।

(i) दैनन्दिन – व्यवहारे बन्धुः कः भवति ?

(ii) समर्थाः देशाः कान्प्रति उपेक्षाभावं प्रदर्शयन्ति ?

(iii) अधुना संसारे कस्य वातावरणम् अस्ति ?

(iv) सर्वेषु समत्वेन का व्यवहरति ?

(v) कयोः प्रकाशः सर्वत्र समानरूपेण प्रसरति ?

(ग) यथानिर्देशं प्रश्नानाम् उत्तराणि लिखत –

(i) “मानवाः परस्परं न विश्वसन्ति ”अत्र कर्तृपदं लिखत।

(ii) “इयं महती आवश्यकता वर्तते ” अत्र विशेष्यपदं लिखत।

(iii) ते परस्य कष्टं स्वकीय कष्टं न गणयन्ति, अत्र ‘ते’ इति सर्वनामपदस्य स्थाने संज्ञापदं लिखत।

(iv) ‘अधस्तात्’ इति पदस्य गद्यांशत् चित्वा विलोमपदं लिखत।

12. अधोलिखितपदयोः सन्धिविच्छेदं कृत्वा सन्धेः नामापि लिखत।
(i) स्वागतम्

(ii) दिग्गजः

13. अधोलिखितपदयोः सन्धिविच्छेदं कृत्वा सन्धेः नामापि लिखत।
(i) पो + अनः

(ii) रामः + च

14. अधोलिखितरेखाक्डिंत – पदेषु समस्तपदानां विग्रहम् अथवा विग्रहपदानां समासं कृत्वा समासस्य नामापि लिखत।
(i) रमेशः प्रतिवारं प्रयासं करोति।

(ii) असौ महाराजः अस्ति।

(iii) माता च पिता च गच्छतः।

15. अधोलिखितरेखाक्डिंत विभक्ति तत् कारणं च लिखत।
(i) ग्रामं परितः क्षेत्राणि सन्ति।

(ii) सीमा गीतया सह पठति।

(iii) नगरात् पृथक् आश्रमः अस्ति।